संस्कृतवार्ताः

23/02/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्रिणा नरेन्द्र मोदिनोक्तं यत् भारतदेशेन तीव्रगत्या आर्टिफिशियल-इंटेलीजेंस क्षेत्रे स्वीय-अभिज्ञानं स्थापितम्। प्रगत्या: प्रशंसा अपि सर्वत्र भवति।

· आकाशवाणित: मन की बात कार्यक्रमे प्रधानमन्त्रिणा भणितं यत् महिलानां योगदानं प्रत्येकस्मिन् क्षेत्रे उल्लेखनीयं, अन्ताराष्ट्रिय-महिलादिवसे सामाजिक-अन्तर्जाल-पटलं दिवसात्मकं प्रेरक-महिलाभ्य: समर्पयिष्यति

· प्रधानमन्त्रिणा प्रोक्तं यत् स्वास्थ्य सर्वेषां कृते प्रशासनं सबका-साथ-सबका-विकास कृते मध्यप्रदेशे आधारशिला एका संस्थापिता।

· तेलंगानायां नागरकुरनूल क्षेत्रे सुरंग-विध्वन्स-दुर्घटनायां अष्ट-श्रमिका: सैन्य सहायतायै निष्कासित:।

· होंडुरास-नगरे समायाते भीषण-सामुद्रिक-झञ्झावाते 'सारा' इति नामधेये भारतेन षड्विंशति-टन मानवीय-सहायता प्रेषिता।

· आईसीसी चैंपियंस-ट्राफी-क्रिकेट- प्रतियोगितायां अद्य दुबई-नगरे इंटरनेशनल-खेल-क्रीडांगणे भारतदेश: चिर प्रतिद्वन्द्वीनं पाकिस्तान-देशं सम्मुखी करोति।

<u>प्रधानमन्त्री-मन की बात</u>

प्रधानममिन्त्रणा नरेन्द्रमोदिनोक्तं यत् आर्टिफिशियल-इंटेलिजेंस-क्षेत्रे भारत-देश: द्रुतगत्या स्वीय अभिज्ञानं सुदृढी करोति। आकाशवाणीत: अद्य मन की बात इत्यस्मिन् कार्यक्रमे श्री मोदिनोक्तं यत् भारतीय-निवासिता: सर्वे जना: नूतन-प्राविधि -क्षेत्रे  आर्टिफिशियल-इंटेलिजेंस जगत्यां अग्रे एव चलन्ति । असौ पेरिस नगर्यां ए. आई. अर्थात् आर्टिफिशियल-इंटेलिजेंस-उपवेशने भागं ग्रहणावसरे वदति स्म।

प्रधानमन्त्रिणोक्तं यत् यूनां सहभागिता-कारणात् अन्तरिक्ष- आर्टिफिशियल-इंटेलिजेंस-सदृश-विभिन्न-क्षेत्रेषु नूतन क्रान्ति समायाता अस्ति। तेन गर्वं-अनुभूय अभिव्यक्तं यत् भारत-देशेन गत-मासे इसरो-माध्यमेन स्वकीय अन्तरिक्ष-यानं प्रक्षेपितम् । तेन भणितं यत् एतेन स्पष्टमस्ति यत् राष्ट्रं प्रतिदिनं अंतरिक्ष-विज्ञाने नूतन-उपलब्धय: प्रापयति।

प्रधानमन्त्रिणा अंतरिक्ष-वैज्ञानिकानां दलं नारीणां सहभागित्वमपि प्रशंसितम् । राष्ट्रिय-विज्ञान-दिवस: अस्मिन् मासे अष्टाविंशति-तारिकायां आमानित:। तेन मार्च अष्टम दिने अन्ताराष्ट्रिय-महिला-दिवस-परिपालन-विषये ऽपि चर्चा प्रकटित:। तेन भणितं यत् अवसरोऽयं नारी-शक्तिं नमन-करणस्य विशिष्ट-अवसरो विद्यते। प्रधानमन्त्रिणा प्रतिपादितं यत् हंसा मेहता वर्येण स्वीय राष्ट्रिय-ध्वज-निर्माणात् तं प्रति हुतात्मभूताभ्य: महिलाभ्य: योगदानमपि अस्माकं समक्षं उपस्थापितम् आसीत्। प्रधानमन्त्रिणा घोषणा एका विहिता यत् महिला- दिवसोपलक्ष्ये असौ एकं पदक्षेपं विधास्यति, यं नारी-शक्तिं विषये पूर्णतया समर्पिता भविष्यति।

प्रधानमन्त्रिणा उत्तराखण्डे राष्ट्रीय-क्रीडासु जनानां सहभागिता चर्चिता । तेनोक्तं यत् आयोजनेऽस्मिन् देवभूम्यां नूतन स्वरूपं प्रस्तुतम्। श्रीमोदिना प्रोक्तं यत् सर्वाधिक-स्वर्ण-पदक-विजेतुं-सैन्य-दलं भूरि-प्रशंसितम्। तेन भणितं यत् अस्मदीय बहव: क्रीडका: 'खेलो इंडिया' इति अभियानस्य योगदानं अस्ति।

प्रधानमन्त्रिणा भणितं यत् अधुना प्रत्येकस्मिन् अष्टमेषु जनेषु एक: स्थूल-कायाया: कारणात् चिन्तितो वर्तते। चिन्तास्पदं वर्तते यत् बालकेरूयपि स्थूलतन-समस्या द्विगुणी भूता जाता। तेनोक्तं यत् जना: स्वकीय-भोजन-चर्चायां परिवर्तनं विधाय आलस्य-मुक्ता: भवितुं शक्नुवन्ति ।

मन- की बात- इति कार्यक्रमे प्रधानमन्त्रिणा स्थूल जनानां विषये ओलम्पिक-पदक-विजेता-नीरज-चौपड़ा- मुष्ठी- क्रीडिका निखत जरीन-प्रख्यात-चिकित्सक देवी शेट्टी एतेषां संदेशा: अपि सर्वश्रवण-गोचरी कृता:।

डॉ. देवी शेट्टी वर्यया प्रोक्तं यत् स्थूल-मनुष्य: सर्वेषु कार्येषु आलस्यपूर्णेन करोति, एतां समस्यां अपाकरणस्य आवश्यकता विद्यते। प्रधानमन्त्रिणा भारतस्य जीवंत-वनस्पति जीव-जन्तूनां उल्लेख: अपि कृत:। तेनोक्तं यत् एशियाई- सिंह:, हंगुल-पिग्मी हॉग- लॉयन- टेल्ड मैकाक-विश्वे कुत्रापि न प्राप्यन्ते। तेन वन्य-जीवन-संरक्षण-सम्बद्ध-कार्येषु सक्रिय-भूमिकां निर्वहणार्थं देशीय जनजातीय जनान् प्रति आभार: प्रकटित:। प्रधानमन्त्रिणा भणितं यत् कर्नाटके बी. आर. टी. बाघ-अभ्यारण्ये-बाघानां संख्या द्रुतगत्या वर्धयति। श्रीमोदिना अंडमान निकोबार-द्वीप-समूहे 'डियर-वुमन' नामधेया अनुराधा-रावस्य उल्लेख: अपि कृत:। अनुराधा रावेन गत त्रिषु दशकेषु मृग-मयूराणां रक्षार्थं अभियानमेकं प्रचालितम्। प्रधानन्त्रिणा परीक्षां भागं ग्रहीतुं तत्परेभ्य: छात्रेभ्य: शुभकामना संदेश: अपि प्रसारित:।

## प्रधानमन्त्री-यात्रा

प्रधानमन्त्री नरेन्द्र मोदी मध्यप्रदेश-बिहार-असम प्रदेशानां त्रिदिवसीय-यात्रोपक्रमे मध्य प्रदेशस्य छतरपुर क्षेत्रं सम्प्राप्तवान्। अन्तावधौ स:छतरपुरजनपदे बागेश्वर-धाम-चिकित्सा एवं विज्ञान-अनुसन्धान-संस्थानस्य आधारशिलां संस्थापितवान्। अत्याधुनिक यन्त्रै सुसज्जितेऽस्मिन् कर्क चिकित्सालये निर्धन-कर्करोगिणां नि:शुल्क-चिकित्सा भविष्यति। प्रधानमन्त्री नरेन्द्र-मोदी अकथयत् यत् सर्वेषां कृते स्वास्थ्यं "तेषां सर्वकारस्य" " सब का साथ, सबका विकास" इत्येतस्य संकल्पस्य मुख्यस्तम्भ: वर्तते। अद्य मध्याह्वे मध्यप्रदेशस्य छतरपुरजनपदे आधारशिलां संस्थापयन् श्रीमोदी प्रोक्तवान् यत् इदं संस्थानं वंचित-कर्क-रोगिभ्य: नि:शुल्क-चिकित्सां प्रापयिष्यति। कर्करोगमालक्ष्य सर्वकारस्य प्रयासान् प्रकटीकुर्वता तेन विज्ञापितं यत् आयत्ययके कर्करोगस्य द्वरीकरणार्थं बह्त्य: घोषणा: कृता:। प्रधानमन्त्री भोपाले दिनद्वयात्मकस्य वैश्विक-निवेशक-शिखर सम्मेलनस्यापि उद्घाटनं विधास्यति।

प्रधानमन्त्री श्व: बिहारस्य भागलपुरक्षेत्रे प्रयास्यति, यन्तस: प्रधानमन्त्री-किसान-योजनाया: एकोनविंशतितमां देयराशिमपि प्रकाशयिष्यति। अनेन माध्यमेन अशेषे हि देशे सप्तति-लक्षाधिक-नवकोटि परिमिता: कृषका: पञ्चशतकोट्यधिक-एकविंशतिसहस्त्र-रूप्यकाणां वित्तीयसहायतां प्राप्स्यन्ति। श्रीमोदी बिहारराज्ये विभिन्न-विकास-परियोजनानां उद्घाटनं लोकार्पणञ्च करिष्यति। अत: परं प्रधानमन्त्री नरेन्द्रमोदी झुमोर-बिनन्दिनी-कार्यक्रमे भागग्रहणार्थं गुवाहाटीं प्रति गमिष्यति।

## तेलंगाना-सुरक्षाभियानम्

तेलंगानायां नागरकुरनूल क्षेत्रे सुरंग-विध्वन्स-दुर्घटनायां अष्ट-श्रमिका: सैन्य हायतायै निष्कासित:। आपदुद्धरणकार्याणि सजवगत्या जायमानानि सन्ति। राष्ट्रीय एवं राज्य-आपत्प्रबन्धनदलं गतदिनादेव घटनास्थले उपस्थितो विद्यते।

## भारत-होंदूरस

भारत-देशेन भीषण-सामुद्रिक-झञ्झावात- 'सारा' इत्यमुमालक्ष्य षड्विंशति-टन-मिता मानवीय-सहायता-प्रेषिता। विदेश मन्त्रालयेन भणितं यत् सहायता-सामग्रयां चिकित्सकीय-उपकरण-ग्लूकोमीटर ऑक्सीमीटर-हस्तावरणकानि-तरल-पदार्था:, वस्त्राणि स्वच्छता- सामग्रीं समेत्य चिकित्सा-आपूर्ति-आपद् साहाय्य-सामग्री अपि समाविष्टा अस्ति।

## राष्ट्रपति-दयानन्द सरस्वती

राष्ट्रपति-पदासीना द्रौपदी मुर्मु: स्वामी-दयानन्द-सरस्वती महाभागस्य जयन्त्यवसरे तस्मै श्रद्धाञ्जलि समर्पितवती। एकस्मिन् सामाजिकान्तर्जालिक-सन्देशे तया प्रोदीरितं यत् स्वामि दयानन्दस्य शिक्षा एवं सामाजिक-परिष्कार-कार्यक्रमैण समाजे सकारात्मक-परिवर्तनार्थं महती भूमिका समाविष्कृता। राष्ट्रपति: प्रोक्तवती यत् स्वामी-दयानन्द: भारतीय-पुनर्जागरणस्य प्रमुख-स्तम्भ वर्तते। तया अभीप्सितं यत् प्रत्येक-नागरिक: देशस्य प्राचीन-गौरवं प्रतिष्ठापयितुं स्वामी-दयानन्द-सरस्वती-महाभागस्य विचारै: प्रेरणां स्वीकृत्य विकसित राष्ट्रस्य निर्माणदिशि अग्रे वर्धेत।

## दिल्ली-विधानसभा-सत्र

दिल्ल्या: नव-रचित-विधानसभाया: प्रथम-सत्रं श्व: प्रभति प्रारप्स्याति। सत्रस्य प्रथम-दिवसे नूतन-निर्वाचित-विधायका: शपथविधां अङ्गीकरिष्यति तदनन्तरं विधानसभा-अध्यक्षस्य निर्वाचनं भविष्यति। द्वितीय-दिवसे उप-राज्यपाल: विनय-कुमार-सक्सेना सदनं संबोधयिष्यति। विगत-प्रशासनस्य कार्य चर्चा संबद्ध-विविध-विवरण-माध्यमेन प्रस्तोष्यति।

## आईसीसी-क्रिकेट

आईसीसी चैंपियंस-ट्राफी-क्रिकेट- प्रतियोगितायां अद्य दुबई-नगरे इंटरनेशनल खेल-क्रीडांगणे भारतदेश: चिर प्रतिद्वन्द्वीनं पाकिस्तान-देशं सम्मुखी करोति। पाकिस्तान-देशेन टॉस-विजित्य प्रथम-खेलनस्य निर्णयो विहित:। भारतीय जना: प्रतियोगिताया: कृते समुत्सुका: वर्तन्ते।

।। इति वार्ता:।।